
Question Paper 2022



docs.aglasem.com

aglasem.com

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12]
Total No. of Printed Pages : 12]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 45]
Total No. of Questions : 45]

ಸಂಕೇತ ಸಂಖ್ಯೆ: 16-S

Code No. : 16-S

A

CCE RF
CCE RR

Question Paper Serial No. **101**

ಕರ್ತಯತ ಇತಃ

ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
Subject : First Language — SANSKRIT
प्रथमभाषा — संस्कृतम्

(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ & ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Fresh & Regular Repeater)

ದಿನಾಂಕ : 28. 03. 2022] [Date : 28. 03. 2022
ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-45 ರವರೆಗೆ] [Time : 10-30 A.M. to 1-45 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 100] [Max. Marks : 100

ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 45 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

परीक्षार्थिनां सामान्यसूचनाः

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) वस्तुनिष्ठाः विषयनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. विषयनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

Tear here

I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत । **6 × 1 = 6**

1. 'जलम्' अस्य समानार्थकपदम् इदं भवति ।

(A) चापः (B) आपः

(C) भूपः (D) शापः ।

2. 'प्रकाशः' अस्य विरुद्धार्थकपदम् इदं भवति ।

(A) प्रभाकरः (B) सुधाकरः

(C) दिवाकरः (D) अन्धकारः ।

3. 'विद्वान्' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

(A) विदूषिका (B) विदुषी

(C) विदुषि (D) विद्वांसः ।

4. 'आज्ञापयति' अत्र एषः लकारः वर्तते ।

(A) लट्लकारः (B) लृट्लकारः

(C) लोट्लकारः (D) लङ्लकारः ।

5. 'उद्यमे' अत्र एषा विभक्तिः वर्तते ।

(A) प्रथमाविभक्तिः (B) तृतीयाविभक्तिः

(C) सप्तमीविभक्तिः (D) चतुर्थीविभक्तिः ।

6. देवदानवयोः घोरं युद्ध प्रावर्तत । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

(A) कति (B) कदा

(C) कुत्र (D) कथम् ।

II. चतुर्थं पदं लिखत । **4 × 1 = 4**

7. केळदीराज्यस्य महाराज्ञी – चन्नम्मा :: मोघलचक्रवर्ती – .....।

8. नद्यः – समुद्रेऽस्तं गच्छन्ति :: विद्वान् – ..... ।

9. शिखराणि – हिमाच्छादितानि :: गमनागमनम् – ..... ।

10. वराहमिहिरः – बृहत्संहिता :: भास्कराचार्यः – ..... ।

III. एकवाक्येन उत्तरं लिखत । **7 × 1 = 7**

11. दधीचिमहर्षेः आश्रमः कुत्र आसीत् ?

12. संस्कृतसाहित्यक्षेत्रे ज्ञानपीठप्रशस्तिपुरस्कृतः कः ?

13. लोके सदा किं शाम्यतु ?

14. भारतमाता कैः पूजिता ?

15. वारिमुचः कीदृशं जलं पिबन्ति ?

16. आहारार्थं किं कुर्यात् ?

17. भरतखण्डः तिसृषु दिक्षु कैः आवृतः ?

IV. द्वित्रैः वाक्यैः उत्तरं लिखत । **4 × 2 = 8**

18. पादपजातयः काः ? तासां जन्म कथं भवति ?

19. भोजस्य जन्मपत्रिकां दृष्ट्वा दैवज्ञः किमाह ?

20. नरस्य वृत्तं के जानन्ति ?

21. आदित्यस्य नमस्कारात् किं किं भवति ?

V. सूचनानुसारम् उत्तरं लिखत । **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

a) बालस्तत्र ।

b) सूर्यादेव ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) प्रतिदिनम् ।

b) केळदीराज्यम् ।

अथवा

समासं कृत्वा समासनाम लिखत ।

a) विषं कण्ठे यस्य सः =

b) जनानां सेवा =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) स्वामिसन्देशं सः आनीतवान् ।

b) बालः क्रीडाङ्गणं गत्वा क्रीडति ।

25. वाक्यदोषं परिहरत ।

a) बालकः चोरेण त्रायते ।

b) वीरस्य युद्धं रोचते ।

VI. संस्कृतभाषया अनुवादं कुरुत । **1 × 2 = 2**

26. ನಮ್ಮ ಭಾರತ ದೇಶದಲ್ಲಿ ಪ್ರಸಿದ್ಧವಾದ ಅನೇಕ ಪುಣ್ಯಕ್ಷೇತ್ರಗಳಿವೆ. ಅವುಗಳಲ್ಲಿ ಗಂಗಾತೀರದಲ್ಲಿ ಶೋಭಿಸುತ್ತಿರುವ ಕಾಶೀಕ್ಷೇತ್ರವೂ ಒಂದು.

There are many famous pilgrimage centres in our India. One among them is Kashi shining brightly on the banks of river Ganga.

VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत । **1 × 2 = 2**

27. श्वः अस्माकं शालायां वार्षिकोत्सवः प्रचलिष्यति । अस्मिन् समारम्भे नानाविधाः सांस्कृतिककार्यक्रमाः भवन्ति ।

VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत । **4 × 3 = 12**

28. ''विज्ञानप्रदर्शिनीं द्रष्टुं गच्छाम'' ।

कः पाठः ? कः वदति ? प्रदर्शिनी कुत्र आयोजिता ?

29. ''संस्कृतेन संस्कृतिरपि सुरक्षिता ।''

कः पाठः ? कः अवदत् ? केन संस्कृतिः सुरक्षिता ?

30. मया भोजो रक्षितः ।

कः पाठः ? कः वदति ? कं वदति ?

31. प्रशास्त्यस्य केसरी नाम वै पिता ।

कः पाठः ? कः अवदत् ? केसरी कस्य पिता ?

अथवा

जग्राह सहसा रविम् ?

कः पाठः ? कः अवदत् ? कम् अवदत् ?

IX. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत । **2 × 3 = 6**

32. विद्वान्. एच्.वि. नागराजराव् ।

33. भरतमुनिः ।

X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत । **3 × 3 = 9**

34. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ।।

35. शैलशृङ्गवासिनीं कृपाकटाक्षशालिनीं

मङ्गलाङ्गशोभितां चराचरादिनायिकाम् ।

वल्लकीप्रभूतदिव्यभव्यगानतोषिणीं

राजराजपूजितां सदा नमामि मातरम् ।।

36. शृङ्गारहास्यकरुणाः रौद्रवीरभयानकाः ।

बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः ।।

अथवा

तस्य भार्या बभूवेष्टा ह्यञ्जनेति परिश्रुता ।

जनयामास तस्यां वै वायुरात्मजमुत्तमम् ।।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं समन्वयत । **1 × 3 = 3**

37. ज्ञानामृतं पीत्वा तुष्टः ।

अथवा

माघे मेघे गतं वयः ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत । **1 × 3 = 3**

38. संसारिकार्तिहरणं शरणं प्रपद्ये ।

XIII. पद्यं पूरयत । **1 × 4 = 4**

39. सुखस्य .....

.....।

.....

..... हि लोकः ।।

XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।

3 × 4 = 12

40. वृत्रवधोपायं ज्ञातुम् आगतान् देवान् ब्रह्मदेवः किम् अवदत् ?

41. हनुमतः जननं बाल्यवृत्तान्तं च पद्यानुगुणं लिखत ।

42. ध्रुवकथां पाठानुगुणं सङ्गृह्य लिखत ।

अथवा

''भारतं संरक्षितुं सन्नद्धः योद्धा हिमवान्'' कथम् ? इति पाठानुगुणं विवृणुत ।

XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत । **1 × 4 = 4**

43. 'राजा प्रत्यक्षदेवता' इति स्मृतिवाक्यं प्रसिद्धम् अस्ति । राजानं प्रजाः स्वपितरम् इव देवम् इव भावयन्ति । तस्मात् राज्ञा अपि एवमेव स्वकर्तव्यं निर्वहणीयम् । यः राजा स्वप्रजाः पुत्रान् इव पालयति स एव राजशब्दार्हः भवति । ''लोकरञ्जनम् एव राज्ञां सनातनः धर्मः'' इति महाभारते उक्तम् । ''स्वप्राणान् त्यक्त्वा अपि राजधर्मः पालनीयः'' इति मत्वा एव अस्माकं देशस्य राजानः स्वप्रजाः पालितवन्तः । जनकः, दशरथः, युधिष्ठिरः भारत-देशस्य प्रख्याताः राजानः आसन् । अत एव 'रञ्जयति इति राजा' इति निष्पत्तिः राजशब्दस्य विषये समन्वेति ।

प्रश्नाः

i) प्रजाः राजानं किमिति भावयन्ति ?

ii) राज्ञः विषये प्रसिद्धं स्मृतिवाक्यं किम् अस्ति ?

iii) कः राजशब्दार्हः भवति ?

iv) भारतदेशस्य प्रख्याताः राजानः के ?

XVI. पत्रं लिखत । **1 × 5 = 5**

44. रामनगरमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा सहोदरस्य विवाहनिमित्तं दिनद्वयस्य विरामं सम्प्रार्थ्य वर्गशिक्षकं प्रति विरामपत्रं लिखत ।

अथवा

'कादम्बरी' इति पुस्तकं प्रेषयितुं निवेद्य धारवाडनगरस्य समाजपुस्तकालयस्य व्यवस्थापकं प्रति आवेदनपत्रं लिखत ।

XVII. दशवाक्यैः प्रबन्धं लिखत । **1 × 5 = 5**

45. समाचारपत्रम् ।

अथवा

गणराज्योत्सवः ।